श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीशैल श्रीरङ्गाचार्ये रचितं

# ॥ श्रीलक्ष्मीगद्यम् ॥

*This document** *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मीगद्यम् ॥

श्रीरङ्गसूरिणेदं श्रीशैलानन्तसूरिवंश्येन।
भक्त्या रचितं गद्यं लक्ष्मीः पद्मावती समादत्ताम्॥

श्रीवेङ्कटेशमहिषी श्रितकल्पवल्ली
पद्मावती विजयतामिह पद्महस्ता।
श्रीवेङ्कटाख्य धरणीभृदुपत्यकायां
या श्रीशुकस्य नगरे कमलाकरेभूत्॥

भगवति जयजय पद्मावति हे !

भागवत निकर बहुतर भयकर बहुळोद्यमयम सद्मायति हे !

भविजन भयनाशि भाग्य पयोराशि वेलातिग लोल विपुलतरोल्लोल वीचि लीलावहे !

पद्मजभव युवति प्रमुखामर युवति परिचारक युवति वितति सरति सतत विरचित परिचरण चरणाम्भोरु हे !

अकुण्ठवैकुण्ठ महाविभूति नायिके !

अखिलाण्डकोटिब्रह्माण्ड नायिके !

श्रीवेङ्कटनायिके !

श्री पद्मावति !

जय विजयी भव !

क्षीराम्भोराशि सारैर्प्रभवति रुचिरैर्यत्स्वरूपे प्रदीपे
शेषाण्येषामृजीषाण्य जनिषत सुधाकल्प देवाङ्गनाद्याः।

www.prapatti.com

यस्यास्सिंहासनस्य प्रविलसति सदा तोरणं वैजयन्ती
सेऽयं श्रीवेङ्कटाद्रि प्रभुवर महिषी भातु पद्मावती श्रीः॥

जय जय जय जगदीश्वर कमलापति करुणारस वरुणालय वेले !

चरणांबुज शरणागत करुणारस वरुणालय मुरबाधन करबोधन सफलीकृत शरणागत जनतागम वेले !

किञ्चिदुदञ्चित सुस्मित भञ्जित चन्द्रकलामद सूचित सम्पद विमल विलोचन जित कमलासन सकृदवलोकन सज्जन दुर्ज्जन भेदविलोपन लीला लोले !

शोभनशीले !

शुभगुणमाले !

सुन्दरभाले !

कुटिल निरन्तर कुन्तल माले !

मणिवर विरचित मञ्जुळ माले !

पद्मसुरभि गन्ध मार्दव मकरन्द फलिताकृति बन्ध पद्मिनी बाले !

अकुण्ठ वैकुण्ठ महाविभूति नायिके !

अखिलाण्डकोटिब्रह्माण्ड नायिके !

श्रीवेङ्कटनायिके !

श्री पद्मावति !

जय विजयीभव !

श्रीशैलानन्तसूरेस्सधवमुपवने चोरलीलां चरन्ती
चाम्पेये तेन बद्धा स्वपतिमवरयत् तस्य कन्या सती या।
यस्याः श्रीशैलपूर्णश्श्वशुरति च हरेस्तात भावं प्रपन्नः
सेऽयं श्री वेङ्कटाद्रि प्रभुवर महिषी भातु पद्मावती श्रीः॥

खर्वी भवदति गर्वी कृत गुरु मेर्वी शिगिरि मुखोर्वीधर कुल दर्वीकर दयितोर्वीधर शिखरोर्वी फणिपति गुर्वीखर कृत रामानुजमुनि नामाङ्कित बहु भूमाश्रय सुर धामालय वर नन्दनवन सुन्दर तरानन्द मन्दिरानन्त गुरु वनानन्तकेलियुत निभृततर विहृति रत लीला चोर राज कुमार निजपति स्वैर सह विहार समय निभृतोषित फणिपति गुरु भक्ति पाश वशंवद निगृहीता राम चंपक निबद्धे !

भक्त जनावन बद्ध श्रद्धे !

भजन विमुख भविजन भगवद् उपसदन समय निरीक्षण सन्तत सन्नद्धे !

भागधेय गुरु भव्य शेष गुरु बाहुमूलधृत बालिका भूते !

श्री वेङ्कटनाथ वर परिगृहीते !

श्री वेङ्कटनाथ तात भूत श्रीशैलपूर्ण गुरु गृहस्नुषा भूते !

अकुण्ठ वैकुण्ठ महाविभूति नायिके !

अखिलाण्डकोटि ब्रह्माण्ड नायिके !

श्री वेङ्कट नायिके !

श्री पद्मावति !

जय विजयी भव !

> श्रीशैलेकेलि काले मुनि समुपगमे या भयात् प्राक् प्रभाता
> तस्यैवोपत्यकायां तदनुशुकपुरे पद्मकासार मध्ये।
> प्रादुर्भूतारविन्दे विकच दळ चये पत्युरुग्रैस्तपोभिः
> सेऽयं श्री वेङ्कटाद्रि प्रभुवर महिषी भातु पद्मावती श्रीः॥

भद्रे !

भक्त जनावन निर्निद्रे !

भगवद् दक्षिण वक्षो लक्षण लाक्षा लक्षित मृदुपदमुद्रे !

भञ्जित भव्य नव्यदर दलित दल मृदुल कोकनदमद विलसदधरोर्ध्व विन्यास सव्याप सव्यकर विराजदनितर शरण भक्त गण निजचरण शरणीकरता भय वितरण निपुण निरूपण निर्निद्र मुद्रे !

उल्लसदूर्ध्व तरा परकर शिखर युगळ शेखर निज मञ्जीम मद भञ्जन कुशल वचन विधुमण्डल विलोकन विदीर्ण हृदयता विभ्रम धरधर विदलित दल कोमल कमल मुकुल युगळ निरर्गल विनिर्गलत् कान्ति समुद्रे !

श्रीवेङ्कट शिखर सह महिषी निकर कान्त लीलावसर सङ्गत मुनि निकर समुदित बहुलतर भयलसदपसार केलि बहुमान्ये !

श्रीशैलाधीश रचित दिनाधीश बिम्ब रमाधीश विषय तपोजन्ये !

श्रीशैलासन्न शुकपुरी सम्पन्न पद्मसर उत्पन्न पद्मिनी कन्ये !

पद्मसरोवर्य रचित महाश्चर्य घोर तपश्चर्य श्रीक मुनिधुर्य कामित वदान्ये !

मानव कर्मजाल दुर्मल मर्म निर्मूलन लब्ध वर्ण निज सलिलज वर्ण निर्जित दुर्वर्ण वज्र स्फटिक सवर्ण सलिल संपूर्ण सुवर्ण मुखरी सैकत सञ्जात सन्तत मकरन्द बिन्दु सन्दोह निष्यन्द सन्दानिता मन्दानन्द मिलिन्द वृन्द मधुरतर झङ्कार खरुचिर सन्तत सम्फुल्ल मल्ली मालती प्रमुख व्रतति वितति कुन्द कुरवक मरूवक दमनकादि गुल्म कुसुम महिम घमघमित सर्व दिङ्मुख सर्वतो मुख महनीया मन्दमाकन्दा विरल नारिकेल निरवधिक क्रमुक प्रमुख तरुनिकर वीधि रमणीय विपुल तटोद्यान विहारिणि !

मञ्जुलतर मणि हारिणी !

महनीय तर मणिजित तरणि मकुट मनोहारिणि !

मन्थरतर सुन्दरगति मत्त मराळ युवति सुगति मदापहारिणि !

कलकण्ठ युवाकुण्ठ कण्ठनाद कल व्याहारिणि !

अकुण्ठ वैकुण्ठ महाविभूति नायिके !

अखिलाण्ड कोटि ब्रह्माण्ड नायिके !

श्रीवेङ्कटनायिके !

श्री पद्मावति !

जय वियवी भव !

यां लावण्य नदीं वदन्ति कवयः श्रीमाधवाम्भो निधिं
गच्छन्तीं स्ववशं गतांश्च तरसा जन्तून्नयन्तीमपि।
यस्या मानन नेत्र हस्तचरणाद्यङ्गानि भूषारुची
अंभोजान्य मलोज्ज्वलं च सलिलं सा भातु पद्मावती॥

अम्भोरुहवासिनि !

अम्भोरुहासन प्रमुखाखिल भूतानुशासिनि !

अनवरतात्मनाथ वक्षः सिंहासनाध्यासिनि !

अङ्घ्रियुगावतार पथ सन्तत सङ्गाहमान घोरतरा भङ्गुर संसार धर्म सन्तप्त मनुज सन्ताप नाशिनि !

बहुल कुन्तल वदन मण्डल पाणिपल्लव रुचिर लोचन सुभग कन्धरा बाहु वल्लिका जघन नितम्ब मण्डलमय वितत शैवाल सम्फुल्ल कमल कुवलय कम्बुकमलिनी नालोत्तुङ्ग विपुल पुलिन शोभिनि !

माधव महार्णव गाहिनि !

महिलावण्य महा वाहिनि !

मुख चन्द्र समुद्यत भालतल विराजमान किञ्चिदुदञ्चित सूक्ष्माग्र कस्तूरी तिलक शूल समुद्भूत भीति विशीर्ण समुज्झित संमुखभाग परिसर युगळ सरभस विसृमर तिमिर निकर सन्देह सन्दायि ससीमन्त कुन्तल कान्ते !

स्फटिक मणिमय कन्दर्प दर्पण सन्देह सन्दोहि सकल जन संमोहि फलफल विमल लावण्य ललित सतत मुदित मुदित मुख मण्डले !

महिम म्रदिम महिम मन्दहासा सहिष्णु तदुदय समुदित क्लमोदीर्णारुण वर्ण विभ्रमद विडम्बित परिणत बिम्ब विद्रुम विलसदोष्ठ युगळे !

परिहसित दरहसित कोकनद कुन्दरद मन्दर तरोद्गत्वर विसृत्वर कान्ति वीचि कमनीयामन्द मन्दहास सदन वदने !

समुज्ज्वलतरमणि तर्जित तरणि ताटङ्क निराटङ्क कन्दलित कान्तिपूर करम्बित कर्ण शष्कुली वलये !

बहिरुप गतस्फुरणाधि गतान्तरङ्गण भूषणगण वदन कोश सदन स्फटिक मणिमय भित्ति शङ्काङ्कुरण चण प्रतिफलित कर्णपूर कर्णावतंस ताटङ्क कुण्डल मण्डन निगनिगायमान विमल कपोल मण्डले !

निज भ्रुकुटी भटी भूत त्र्यक्षाष्टाक्ष द्वादशाक्ष सहस्राक्ष प्रभृति सर्व सुपर्व शोभन भ्रूमण्डले !

निटल फलक मृग मद तिलकच्छल विलोककलोक विलोचन दोष विरचित विदलन वदन विधुमण्डल विगळित नासिका प्रणालिका निगूढ विस्तृत नासाग्र स्थूल मुक्ता फलच्छलाभि व्यक्त वदन बिल निलीन कण्ठनालि कान्तः प्रवृत्त ग्रीवा मध्योच्च भागकृत विभाग ग्रीवागर्त विनिस्सृत पृथुल विलसदुरोज शैलयुगळ निर्झर झरीभूत गंभीरनाभि ह्रदावगाढ विलीन दीर्घतर पृथुल सुधाधारा प्रवाह युगळ विभ्रमाधारा विस्पष्ट वीक्ष्यमाण विशुद्ध स्थूल मुक्ताफल माला विद्योतित दिगन्तरे !

सकलाभरण कला विलासकृत जङ्गम चिरस्थायि सौदामनी शङ्काङ्कुरे !

कनक रशना किङ्किणी कल नादिनि !

निज जनता गुण निजपति निकट निवेदिनि !

निखिल जना मोदिनि !

निजपति संमोदिनि !

मन्थर तरमेहि !

मन्दर्मि मम वेहि !

मयिमन आधेहि !

मम शुभमस्येहि !

मङ्गळ मयि भाहि !

अकुण्ठ वैकुण्ठ महाविभूति नायिके !

अखिलाण्डकोटि ब्रह्माण्ड नायिके !

श्रीवेङ्कटनायिके !

श्री पद्मावति !

जय विजयी भव !

जीयाच्छ्री वेङ्कटाद्रि प्रभुवर महिषी नाम पद्मावती श्रीः
  जीयाच्चास्याः कटाक्षामृत रस रसिको वेङ्कटाद्रेरधीशः।
जीयाच्छ्रीवैष्णवाली हत कुमतकथा वीक्षणैरेतदीयैः
  जीयाच्च श्रीशुकर्षेः पुरमनवरतं सर्व सम्पत्समृद्धम्॥

॥ इति श्रीलक्ष्मीगद्यं सम्पूर्णम्॥

www.prapatti.com